# Shri Ramaksharamala Stotram

# શ્રીરામાક્ષરમાલાસ્તોત્રમ્

## Document Information

Text title : Shri Ramaksharamala Stotram

File name : rAmAkSharamAlAstotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# શ્રીરામાક્ષરમાલાસ્તોત્રમ્

અખિલાધારં શ્રીરામં
આગમવિનુતં શ્રીરામમ્ ।
ઇષ્ટરક્ષણં શ્રીરામં
ઈપ્સિતફલદં શ્રીરામમ્ ॥ ૧॥

ઉગ્રપૂજિતં શ્રીરામં
ઊર્જિતફલદં શ્રીરામમ્ ।
ઋષિગણવન્દ્યં શ્રીરામં
ૠવરપક્ષં શ્રીરામમ્ ॥ ૨॥

લૃચયસ્તોત્રં શ્રીરામં
લૄ(લૂ)નનતાદ્યં શ્રીરામમ્ ।
એકવિક્રમં શ્રીરામં
ઐહિકફલદં શ્રીરામમ્ ॥ ૩॥

ઓન્નુતિફલદં શ્રીરામં
ઔદાર્યવરં શ્રીરામમ્ ।
અદ્ભુત(અમ્બુદ)રૂપં શ્રીરામં
આમુષ્મિકદં શ્રીરામમ્ ॥ ૪॥

કમ્બુગ્રીવં શ્રીરામં
ખરસંહારં શ્રીરામમ્ ।
ગજરાડ્વરદં શ્રીરામં
ઘનસદૃશાઙ્ગં શ્રીરામમ્ ॥ ૫॥

(૧)ઙજ્યુતિકરણં શ્રીરામં
ચટુલાસ્ત્રધરં શ્રીરામમ્ ।
છન્દોવિનુતં શ્રીરામં
જલજાતાક્ષં શ્રીરામમ્ ॥ ૬॥

Footnote

૧. ઇતિ શિવસ્ય નામ ।  તસ્ય જ્યુતિઃ દ્યુતિઃ, તસ્યાઃ કારણં

ઝષવરરૂપં શ્રીરામં
(૨)ઞી(ઞે)શાત્મસ્થં શ્રીરામમ્ ।
(૩)ટીદૃશ(ટિટ્ટિભ)હસ્તં શ્રીરામં
(૪)ઠપૂજાઙ્ઘ્રિં શ્રીરામમ્ ॥ ૭॥

(૫)ડાપતિનાશં શ્રીરામં
(૬)ઢમ્મન્ત્રહરં શ્રીરામમ્ ।
(૭)ણક્રોધાત્મં શ્રીરામં
તપનાન્વયજં શ્રીરામમ્ ॥ ૮॥

(૮)થપરિપાલં શ્રીરામં
દશરથબાલં શ્રીરામમ્ ।
ધરણીલોલં શ્રીરામં
નરહરિરૂપં શ્રીરામમ્ ॥ ૯॥

પરમપાવનં શ્રીરામં
ફલ્ગુનસુહૃદં શ્રીરામમ્ ।
બલિમદદલનં શ્રીરામં
(૯)ભણ્ડનસુદૃશં શ્રીરામમ્ ॥ ૧૦॥

મન્મથજનકં શ્રીરામં
યમિજનવેદ્યં શ્રીરામમ્ ।
રઘુકુલતિલકં શ્રીરામં
લક્ષ્મીલોલં શ્રીરામમ્ ॥ ૧૧॥

Footnote

૨. ઞઃ ઇતિ શુક્રસ્ય નામ ।  તસ્ય ઈશઃ અધિદેવતા અમ્બિકા, તદાત્મસ્થમ્ ।

૩. ટિટ્ટિભઃ પક્ષિવિશેષઃ ।

૪. ઠઃ ઇતિ શિવસ્ય નામ ।

તસ્ય પૂજા યસ્મિન્ સઃ ઠપૂજઃ ।  ઠપૂજઃ અઙ્ઘ્રિઃ યસ્ય તમ્ ।

૫. ડા રાક્ષસી ।  તાસાં પતયઃ રાક્ષસાઃ, તેષાં નાશઃ યેન, તમ્ ।

૬. ઢઃ સર્પઃ, તસ્ય મન્ત્રઃ નાગાસ્ત્રમ્, તસ્ય હરમ્ ।

૭. ણઃ ન ક્રોધઃ, અક્રોધાત્માનમ્ ।

૮. યં ભયમ્, ભયત્રાતારમ્ ।

૯. ભણ્ડનં યુદ્ધમ્, તસ્મિન્ દક્ષમ્ ।

વદનજિતેન્દું શ્રીરામં
શઙ્કરવિનુતં શ્રીરામમ્ ।
ષટ્પદકાન્તં શ્રીરામં
સરસિજનાભં શ્રીરામમ્ ॥ ૧૨॥

હતદેવારિં શ્રીરામં
લક્ષ્મણાગ્રજં શ્રીરામમ્ ।
વનજાતદૃશં શ્રીરામં
શફરસુનયનં શ્રીરામમ્ ॥ ૧૩॥

ષડ્ગુણ્યજ્ઞં શ્રીરામં
સરસિજનયનં શ્રીરામમ્ ।
હતદેવારિં શ્રીરામં
(૧૦)ક્ષરણવિરહિતં શ્રીરામમ્ ॥ ૧૪॥

Footnote

૧૦. ક્ષરણં સ્વેદઃ, તદ્રહિતમ્ ।

ઇતિ શ્રીરામાક્ષરમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramaksharamala Stotram*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*